Roll No. ..........................

Total No. of Pages : 5

Total No. of Questions : 22

# पूर्वमध्यमा द्वितीयखण्ड (10वीं) वार्षिक परीक्षा 2025–26

## विषय कोड : 1010

## दर्शनम् एवं भारतीयविज्ञानम्

**समय : 3 घण्टे** **पूर्णांक : 70**

---

**निर्देशाः**— (*i*) **सर्वे** प्रश्नाः अनिवार्याः सन्ति।

(*ii*) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

(*iii*) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेनैव लेखनीयानि।

1. उचितं विकल्पं चित्वा लिखत्— 4×1=4

(क) पदकृत्यानुसारेण पदार्थज्ञानस्य परमप्रयोजनम् अस्ति—

(अ) भोगः (ब) मोक्षः

(स) योगः (द) स्वर्गः

(ख) 'भूतले घटो नास्ति' इति उदाहरणम् अस्ति—

(अ) अत्यन्ताभावस्य (ब) प्रागभावस्य

(स) प्रध्वंस्य (द) अन्योन्याभावस्य

(ग) परामर्शजन्यं ज्ञानं भवति—

(अ) उपमितिः (ब) अनुमितिः

(स) अनुमानम् (द) उपमानम्

(घ) 'पदकृत्य' इति टीकायाः रचनाकारः अस्ति–

(अ) श्रीगोवर्धनाचार्यः (ब) श्रीनीलकण्ठः

(स) श्रीचन्द्रसिंहः (द) श्रीकेशवभट्टः

2. कोष्ठके प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत– 1×4=4

(1) निषिद्ध ............................ जन्योऽधर्मो भवति। (कर्म/अकर्म)

(2) अनुभवजन्या स्मृतिहेतुः ............................। (वेगः/भावना)

(3) बुद्ध्यादयः नित्या ईश्वरस्य अनित्या ............................। (जीवस्य/अजीवस्य)

(4) व्याप्यारोपेण व्यापकारोपः ............................। (तर्कः/विपर्ययः)

3. उचितं युग्ममेलनं कुरुत– 1×4=4

| (अ) | | (आ) | |
|---|---|---|---|
| (1) | मिथ्याज्ञानम् | (*i*) | वैदिकवाक्यम् |
| (2) | सर्वमेव प्रमाणम् | (*ii*) | विपर्ययः |
| (3) | यथार्थवक्ता | (*iii*) | योग्यता |
| (4) | अर्थाबाधः | (*iv*) | आप्तः |

4. सत्यवाक्यानां समक्षं "सत्यम्" असत्यवाक्यानां समक्षं "असत्यम्" इति लिखत– 1×4=4

(1) सञ्ज्ञा-सञ्ज्ञिज्ञानमुपमितिः न भवति।

(2) "स्थाणुर्वा पुरुषो वा" इति संशयस्य उदाहरणम् अस्ति।

(3) वाक्यं द्विविधं न भवति।

(4) "पर्वतो वह्निमान्" इति ज्ञानम्–उपमितिः न भवति।

5. एकपदेन उत्तरं लिखत— 1×4=4

(1) अनुमानं कति विधम् ?

(2) निश्चितसाध्यवान् कः ?

(3) लिङ्गं कति विधम् ?

(4) तर्कसंग्रहस्य रचनाकारः अस्ति ?

अधोलिखितानाम् प्रश्नानाम् उत्तराणि विंशतिः (**20**) शब्देषु लिखत—

6. पदकृत्यानुसारेण उपाधेः लक्षणं लिखत। 2

7. पदकृत्यानुसारेण किं वारणाय मिथ्याज्ञानं भवति ? इति लिखत। 2

8. विशेषस्य स्वरूपं लिखत। 2

9. पदकृत्यानुसारेण असिद्धस्य भेदान् लिखत। 2

10. पदकृत्यानुसारेण सन्निधेः लक्षणं लिखत। 2

11. पदकृत्यानुसारेण द्वेषस्य स्वरूपं लिखत। 2

12. पदकृत्यानुसारेण संशयस्य लक्षणं लिखत। 2

अधोलिखित लघूत्तरीयप्रश्नानाम् उत्तराणि चत्वारिंशत्शब्देषु (**40**) लिखत—

13. पदकृत्यानुसारेण व्याप्ति-विशिष्ट-पक्षधर्मता-ज्ञानं किं ? इति विवेचयत। 3

**अथवा**

पदकृत्यानुसारेण व्याप्यस्य पर्वतादि वृत्तित्वं का ? इति स्पष्टयत।

14. पदकृत्यानुसारेण उपमितिकरणं किं ? इति निरूपयत। 3

**अथवा**

पदकृत्यानुसारेण "वाक्यं पद समूहः" इति स्पष्टयत।

15. पदकृत्यानुसारेण "अनादिः सान्तः" इति स्पष्टयत। 3

**अथवा**

गदकृत्यानुसारेण "सादिरनन्तः" इति स्पष्टयत।

16. पदकृत्यानुसारेण प्रयत्नस्य लक्षणं किम् ? इति स्पष्टयत। 3

**अथवा**

पदकृत्यानुसारेण भावनायाः स्वरूपं निरूपयत।

17. "नित्यमेकमनेकानुगतम्" इति कस्य लक्षणं ? पदकृत्यानुसारेण सोदाहरणेन वर्णयत। 3

**अथवा**

"नित्यद्रव्यवृत्तयो व्यावर्तकाः" इति कस्य लक्षणं ? पदकृत्यानुसारेण सोदाहरणेन वर्णयत।

अधोलिखितानां दीर्घोत्तरीयप्रश्नानाम् उत्तराणि अशीतिः (80) शब्देषु लिखत--

18. पदकृत्यानुसारेण स्वार्थानुमानस्य स्वरूपं लिखत 4

**अथवा**

पदकृत्यानुसारेण परार्थानुमानस्य स्वरूपं निरूपयत।

19. यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते, इति सत्प्रतिपक्षस्य स्वरूपं स्पष्टयत। 4

**अथवा**

अधोलिखितेषु विषयेषु टिप्पणीं लिखत (कौ **द्वौ**)–

(क) विरुद्धहेत्वाभासः

(ख) असत्प्रतिपक्षः

(ग) आश्रयासिद्धः।

20. पदकृत्यानुसारेण सामान्यस्य स्वरूपं लिखत। 4

**अथवा**

पञ्चकर्मणः स्वरूपं लिखत।

21. "घटः पटो ना" इति कस्य अभावस्य उदाहरणं ? स्पष्टयत। 4

**अथवा**

प्रध्वंसस्य स्वरूपं पदकृत्यानुसारेण निरूपयत।

विश्लेषणात्मक-प्रश्नः –

22. सपदकृत्यानुसारेण केवलव्यतिरेकि-लिङ्गस्य स्वरूपं सविस्तरेण स्पष्टयत। 5

**अथवा**

"यत्र-यत्र धूमस्तत्र तत्र वह्निः इति साहचर्य-नियमः" सपदकृत्यानुसारेण सविस्तरेण स्पष्टयत।